International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 356-361
© 2022 IJSR
www.anantaajournal.com
Received: 28-03-2022
Accepted: 09-05-2022

**Balabhadra Karna**
Ph.D Scholar, School of Sanskrit
Gangadhar Meher University,
Amruta Vihar, Sambalpur,
Odisha, India

**Corresponding Author:**
**Balabhadra Karna**
Ph.D Scholar, School of Sanskrit
Gangadhar Meher University,
Amruta Vihar, Sambalpur,
Odisha, India

# पाणिनीयशिक्षायां संस्कृतवर्णविचारः

**Balabhadra Karna**

**सारांश**

पाणिनीयशिक्षा महर्षिपाणिनिना विरचिता । पाणिनीयशिक्षायां षष्टिः (६०) कारिकाः सन्ति । पाणिनीयशिक्षानुसारं संस्कृतवर्णाः त्रिषष्टिः(६३) चतुर्षष्टिः(६४) वा सन्ति । तथा हि- स्वरवर्णाः एकविंशतिसंख्यकाः (२१) + स्पर्शवर्णाः पञ्चविंशतिसंख्यकाः (२५) + यादयः अष्टसंख्यकाः (८) + यमवर्णाः चत्वारः (४) + अनुस्वारः एकः (१) + विसर्गः एकः (१) + जिह्वामूलीयः कः (१) + उपध्मानीयः पः (१) + दुःस्पृष्टः ळकारः (१) + प्लुतः ऌकारः (१) = ६४ । एवंरूपेण पाणिनीयशिक्षायां प्लुतऌकारं विहाय त्रिषष्टिः(६३) वर्णाः, प्लुतऌकारग्रहणेन चतुःषष्टिः(६४) वर्णाः भवन्ति ।

**कुञ्चिकाशब्दाः** पाणिनीयशिक्षा, स्वरवर्णः, स्पर्शवर्णः, अन्तःस्थवर्णः, ऊष्मवर्णः,अनुस्वारः, विसर्गः ।

## वर्णनीयविषयवस्तु

शोधपत्रेऽस्मिन् पाणिनीयशिक्षादृष्ट्या संस्कृतवर्णानां पूर्णपरिचयः प्रदीयते ।

## उपक्रमः

वर्ण् (वर्णने) धातोः अच्-प्रत्यययोगेन वर्णशव्दस्य निष्पतिर्भवति । प्राचीनकालादेव भारतीयाऽऽस्तिकार्याणां पुण्यग्रन्थः वेदः वर्णशव्दस्य विषये बहुधा उल्लेखं करोति । वर्णेन एव स्वयंपुष्टः वर्णराशिणां समाहारः वेदः ब्रह्ममयः भवति एव । वर्णज्ञानं विना ब्रह्मज्ञानं न सम्भवति इति शौनकेनोक्तम् ।[1] अमरकोशे "वर्ण" शब्दः जाति-रङ्ग-स्तुति-स्तव-अक्षरार्थकः इत्युच्यते ।[2] प्रथमतया ऋग्वेदसंहितायां वर्णशब्दःरङ्गार्थेजात्यर्थे च प्रयुक्तः भवति ।[3] परन्तु स्वरार्थे व्यञ्जनार्थे च वर्णशब्दस्य प्रयोगः प्रथमतया ऐतरेयब्राह्मणे एव अभवत् । अनन्तरं गोपथब्राह्मणे [4] तैत्तिरीय-आरण्यके [5] निरुक्ते [6] च एव वर्णशब्दस्य प्रयोगः स्वरव्यञ्जनार्थे अभवत् । शौनकशिक्षाग्रन्थे अयं वर्णशब्दः स्वरव्यञ्जनार्थे एव प्रयुज्यते ।

यत्र अकारादिस्वराणां ककारादिव्यञ्जनादीनां चोल्लेखः स्पष्टतया दृश्यते ।[7] पाणिनीयशिक्षायामपि वर्णशब्दस्य प्रयोगः स्वरव्यञ्जनार्थे भवत्येव । तत्र त्रिषष्टिः चतुर्षष्टिः वा वर्णाः सन्तीति महर्षिपाणिनिना उक्तम् ।[8] एतदतिरिक्तं अन्येषु शिक्षाग्रन्थेष्वपि एतेषां वर्णानां विषये उल्लिखितमस्ति ।

**पाणिनीयशिक्षायां वर्णविभाजनम्**

महर्षिपाणिनिना प्रणीते पाणिनीयशिक्षाग्रन्थे प्रथमतया तस्य अनुयायिना महर्षेः पाणिनेः मतोद्धारपूर्वकमुक्तम् । तथा हि-

अथ शिक्षां प्रवक्षामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्वं तद्विद्यात् यथोक्तं लोकवेदयोः ।।
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ।।[9]

अर्थात्, अहं यत् शिक्षावेदाङ्गशास्त्रं प्रवचनेन विशदीकरिष्यामि । तच्च पाणिनीयमतानुसारं पाणिनिरचितं पाणिनीयशिक्षा नाम शिक्षावेदाङ्गशास्त्रं लोकवेदोक्तम् पूर्वाचार्यपरम्परागतशास्त्रानुशासनपूर्वकं च भवतीति विजानीयात्। यद्यपि लोके वेदे च साधुशब्दानामुच्चारणं प्रयोगश्च भवतः, तथापि ये अबुद्धयः साधुशब्दोच्चारणबोधरहिताः मन्दमतयः स्वल्पवुद्धिविशिष्टजनाः सन्ति, तेषां मन्दमतीनां स्वल्पवुद्धिजनानां कृते वेदमन्त्राणां सुष्ठूच्चारणार्थं सुप्रयुक्तार्थञ्च तथा अदृष्टपापानां प्रशमनार्थम् एतेषां पुनरालोचनम् आवश्यकमेव । अतः साधुशब्दस्य समुच्चारणविषयकविधिशास्त्रमिदं पाणिनीयशिक्षावेदाङ्गशास्त्रं साधुशब्दोच्चारणबोधरहितेभ्यः जनेभ्यः पुनर्व्यक्तीकरिष्यामि ।

पाणिनीयशिक्षायाः निम्नोक्तेषु त्रिसृषु कारिकासु वर्णविषये उपदिश्यते । तथा हि-

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ।।३।।

अर्थात्, पाणिनीयशिक्षानुसारं संस्कृतवर्णाः त्रिषष्टिः (६३) चतुर्षष्टिः (६४) वा सन्ति । शम्भूमतेन वैदिकसंस्कृतभाषायां लौकिकसंस्कृतभाषायाञ्च वर्णाः त्रिषष्टिसंख्याकाः चतुर्षष्टिसंख्याकाः वा सन्ति । महर्षिपाणिनिना एते वर्णाः भगवतः शङ्करस्य प्रसादात् प्राप्ताः । पुनश्च "प्राकृते संस्कृते चाऽपि" इत्यत्र प्राकृते इत्युल्लेखात् प्राकृतादिभाषाशास्त्रे इति वोध्यते । परन्तु "प्राकृते संस्कृते चाऽपि" इत्यत्र प्राकृते इति वैदिकसंस्कृतभाषायामिति बुध्यते इति अवस्थी-बच्चूलालज्ञानोपाह्वेन तस्य पाणिनीयशिक्षाग्रन्थे उल्लिखितम् । तथा हि- "प्राकृतमिह खलु वैदिकं वचः, तत्र हि व्याकरणशास्त्रीयाः संस्कारा न प्रभवन्तीति कृत्वा प्रकृत्यैव निष्पन्नम् । यमाः संस्कृते न प्रयुज्यन्त इति मनसिकृत्य चापीत्युक्तम् । "स्वयं प्रोक्ताः स्वयंभुवा" इत्यनेन कल्पादौ स्वयम्भुवा ब्रह्मणा स्वयमेव प्रोक्ता इमे वर्णा इत्याचार्यपरम्परा सूचिता ।"

स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।।४।।

अर्थात्, स्वरवर्णाः एकविंशतिसंख्याकाः (२१), स्पर्शवर्णाः पञ्चविंशतिसंख्याकाः (२५), यादयः अष्टसंख्याकाः (८), यमवर्णाः चत्वारः (४) च भवन्ति ।

अनुस्वारो विसर्गश्च क पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ।।५।।

अर्थात्, अनुस्वारः एकः (१), विसर्गः एकः (१), जिह्वामूलीयः कः (१), उपध्मानीयः पः (१), दुःस्पृष्टः ळकारः (१), प्लुतः ऌकारः (१) ।

एवंरूपेण प्लुतऌकारं विहाय त्रिषष्टिः(६३) वर्णाः, प्लुतऌकारग्रहणेन चतुःषष्टिः(६४) वर्णाः भवन्ति ।

**पाणिनीयशिक्षायां स्वरवर्णानां विवेचनम्**

स्वरशब्दः स्वर् धातोः अच् प्रत्यययोगेन निष्पद्यते, यस्य अर्थो भवति शब्दायति ध्वनयति वा । ऋक्प्रातिशाख्ये स्वरशब्दस्य निर्वचनं कृत्वा कथ्यते यत्- "स्वर्यन्ते शब्दान्त इति स्वराः"। [10] सिद्धान्तकौमुद्यामपि श्रीभट्टोजिदीक्षितेनोक्तोम्-"स्वयं राजन्ते उच्चार्यन्ते इति स्वराः"[11] अर्थात् ये वर्णाः विनाऽपि साहाय्येन स्वयमेव उच्चारिताः भवन्ति, ते स्वरवर्णाः इति कथ्यन्ते । पाणिनीयशिक्षानुसारं संस्कृतस्वरवर्णाः एकविंशतिसंख्याकाः भवन्ति । ते यथा-

अ इ उ ऋ इत्येते वर्णाः ह्रस्व-दीर्घ-प्लुतभेदेन द्वादशप्रकाराः भवन्ति। तथा हि-अ आ आ३ इ ई ई३ उ ऊ ऊ३ ऋ ॠ ऋ३। ह्रस्वलृकारः एक एव भवति ।

ए ऐ ओ औ इत्येते दीर्घ-प्लुतत्वेन अष्टौ भवन्ति । तथा हि- ए ए३ ऐ ऐ३ ओ ओ३ औ औ३ ।

एतेषु यदि लृ३ कारस्य प्लुतत्वं गृह्यते, तर्हि वर्णानां संख्या चतुःषष्टिः भवति, अन्यथा वर्णसंख्या त्रिषष्टिः इति ।

**पाणिनीयशिक्षायां व्यञ्जनवर्णानां विवेचनम्**

पाणिनीयशिक्षायां व्यञ्जनवर्णानां संख्या भवति त्रिचत्वारिंशत् । "व्यञ्जन" शब्दः "वि" उपसर्गपूर्वकं अञ्ज् धातोः"ल्युट्" प्रत्यययोगेन निष्पद्यते । यस्य अर्थो भवति प्रकाशति प्रकटयति व्यक्तं भवति वा । तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणभाष्ये एतस्य व्युत्पत्तिप्रसङ्गे वर्णितमस्ति यत्- यस्य अभिव्यक्तिः स्वरेण एव भवति तदेव व्यञ्जनम् ।[12] परन्तु ऋक्प्रातिशाख्ये ये वर्णाः अर्थं प्रकाशयन्ति, ते व्यञ्जनानि इति वर्ण्यते ।[13] अर्थात् स्वरवर्णानां साहाय्येन ये वर्णाः उच्चार्यन्ते, ते व्यञ्जनवर्णाः इति कथ्यन्ते । एते व्यञ्जनवर्णाः संस्कृतव्याकरणे हल् नाम्ना परिचिताः । प्रथमतया एते व्यञ्जनवर्णाः वर्ग्य-अवर्ग्यभेदेन द्विधा विभज्यन्ते । पुनश्च वर्ग्यव्यञ्जनाः कण्ठ्य-तालव्य-मुर्द्धन्य-दन्त्य-ओष्ठ्यादिभेदेन पञ्चवर्गैः विभक्ताः । अनन्तरं अवर्ग्यव्यञ्जनाः अन्तःस्थ-ऊष्म-अयोगवाहादिभेदेन त्रिधा विभज्यन्ते ।

**वर्ग्यव्यञ्जनाः (स्पर्शवर्णाः)**

"कादयोमावसनाः स्पर्शाः" ।[14] अर्थात् "क" कारात् आरभ्य "म" कारः यावत् वर्णाः स्पर्शसंज्ञकाःभवन्ति । स्पर्शवर्णानां संख्या पञ्चवंशतिः (२५) ।यथा-क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म इति ।एते वर्णाःव्याकरणशास्त्रे उच्चारणस्थानाधारेण पञ्चवर्गेषु विभज्यन्ते । ते भवन्ति -

- **कण्ठ्याः**-ये वर्णाः कण्ठस्थाने उच्चारिताः भवन्ति, ते कण्ठ्यवर्णाः इति कथ्यन्ते ।
  यथा-क ख ग घ ङ ।
- **तालव्याः**- ये वर्णाः तालुस्थाने उच्चार्यन्ते, ते तालव्यवर्णाःइति कथ्यन्ते ।
  यथा-च छ ज झ ञ ।
- **मूर्धन्याः**- मूर्धास्थाने ये उच्चार्यन्ते, ते मूर्धन्यवर्णाःइति कथ्यन्ते ।
  यथा- ट ठ ड ढ ण ।
- **दन्त्याः**- दन्तस्थाने ये वर्णाः उच्चार्यन्ते, ते दन्त्यवर्णाः इति कथ्यन्ते ।
  यथा- त थ द ध न ।
- **ओष्ठ्याः**-ओष्ठस्थाने ये वर्णाः उच्चार्यन्ते, ते ओष्ठ्यवर्णाः इति कथ्यन्ते ।
  यथा- प फ ब भ म ।

**अवर्ग्यव्यञ्जनाः**

अवर्ग्यव्यञ्जनाः अन्तःस्थवर्णाः ऊष्मवर्णाः अयोगवाहवर्णाश्च अवर्ग्यव्यञ्जनावर्णान्तर्गताः भवन्ति ।

**यादयः (अन्तःस्थवर्णाः, ऊष्मवर्णाः)**

पाणिनीयशिक्षानुसारं यादयः अष्टवर्णाः एकत्रमेव सन्ति । परन्तु एते वर्णाः अन्तःस्थ-ऊष्मभेदेन द्विधा विभज्यन्ते । तेषु य र ल व चत्वारः अन्तःस्थसंज्ञकाः, श ष स ह चत्वारः ऊष्मसंज्ञकाश्च । ककारादिस्पर्शवर्णेभ्यः परं तथा पश्चात् शषसह चेति

ऊष्मवर्णेभ्यः पूर्वं अर्थात् स्पर्शवर्ण-ऊष्मवर्णयोः अन्तः विद्यमानाद् य र ल व चैते वर्णाः अन्तःस्थाः इति कथ्यन्ते । अपि च अष्टाध्याय्याः वर्णसमाम्नायेऽपि अच् हलयोः अन्तः एते वर्णाः तिष्ठन्ति,एतदर्थमपि एतेषां य र ल व वर्णानां नामकरणम् अन्तःस्थाः इति क्रियन्ते । यथा- यरलवा अन्तःस्थाः । [15]

श ष स हचैतेषां वर्णानामुच्चारणे मुखविवरस्य वायुः ऊष्मः भवति, अतः एते वर्णाः ऊष्माणः इति कथ्यन्ते ।यथा-शषसहा ऊष्माणः ।[16] परन्तु ऋक्प्रातिशाख्ये ऊष्मवर्णानां संख्या अष्ट इति स्वीकृतम् । तथा हि- उत्तरेऽष्टा ऊष्माणः । अर्थात्, ह श ष स अः (विसर्गः) जिह्वामूलीय-क उपध्मानीय-प अं (अनुस्वारः) चेति अष्टवर्णाः ऊष्मवर्णाः भवन्ति ।[17]

**अयोगवाहवर्णाः (अनुस्वारः यमवर्णाः विसर्गः जिह्वामूलीयः उपध्मानीयवर्णश्च)**

युज्यन्ते इति योगाः नाम वर्णसमाम्नाये ये वर्णाः पाठयोगं प्राप्ताः । न योगा अयोगाः नाम वर्णसमाम्नाये स्वाश्रयं विना ये वर्णाः पाठयोगमप्राप्ताः । वाहयन्ति पाठव्यवहारकार्यं शब्दोच्चारणेषु निर्वाहयन्तीति वाहाः । अयोगाश्च ते वाहाश्चेत्ययोगवाहाः । अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीय-यमाश्चेति वर्णाःवर्णसमाम्नाये अपठितत्वात् अयोगवाहाः वर्णाः भवन्ति। अयोगवाहाः आश्रायभूतस्य स्वरस्य यत् स्थानं तद् भजन्ति तच्छीला भवन्तीति हेतोः एते वर्णाः आश्रयस्थानभागिनो भवन्ति। अनुस्वारो यमाश्च अयोगवाहत्वात् यद्यपि आश्रयस्थानभागिनः भवन्ति, तथापि एतेषाम् अनुस्वारयमवर्णानां स्थानं नासिका भवतत्युच्यते महर्षिपाणिनिना । तथा हि-

अनुस्वारयमानां च नासिका स्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ।। [18]

परन्तु हकारे रकारे शकारे षकारे सकारे च परे सति पूर्वस्थितः स्वरानुगः अनुस्वारः नित्यं दन्तमूल्यः अलाबुवीणानिर्घोषः स्यात् ।यथा- संहारः, संरक्षणम्, अंशुकम्, धनूंषि, हंसः । तथा हि-

अलाबुवीणानिर्घोषो दन्त्यमूल्यः स्वरानुगः ।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ।।[19]

पाणिनीयव्याकरणे महर्षिपाणिनिना "मोऽनुस्वारः" [20] इति सूत्रेण "म्" कारस्य स्थाने अनुस्वारादेशः स्यात् व्यञ्जनवर्णे परे सति । सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन अनुस्वारस्य उच्चारणस्य स्थानं नासिका इत्युक्तम् । तथा हि- नासिका अनुस्वारस्य ।[21]

"वर्गेष्वाद्यानां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः ।" अर्थात् पदमध्ये वर्गेषु आद्यवर्गस्य (कवर्गस्य) प्रथमचतुर्णां वर्णानां (क ख ग घ) परे पञ्चवर्गाणां पञ्चमवर्णः भवेच्चेत् तर्हि पूर्वसदृशस्य वर्णस्य आगमः भवेत्, सः वर्णः यमवर्णः नाम्ना प्रसिद्धः । उदाहरणं यथा–पलिक्क्ँनी, चख्ख्ँतुः, जग्ग्ँमतुः, जघ्घ्ँनतुः ।[22]

पाणिनीयशिक्षायां विसर्गः अयोगवाहरूपेण गृह्यते । "खरवसानयोर्विसर्जनीयः"[23] इति सूत्रेण "र्" कारस्थाने विसर्गादेशो भवति ।

पाणिनीयशिक्षायाम् उल्लिखितः जिह्वामूलीयः "क"वर्णः जिह्वामूले उच्चार्यते तथा उपध्मानीयः पवर्णः ओष्ठस्थाने उच्चार्यते । एतौ द्वौ वर्णौ अर्धविसर्गचिह्नेन चिह्नितौ भवतः ।

वेदमन्त्रवाक्ये "ड""ढ" कारयोः स्थाने प्राप्तः "ळ" कारः एव दुःस्पृष्टवर्णः भवति ।

**उपसंहारः**

पाणिनीयशिक्षायाम् स्पष्टरूपेण संस्कृतवर्णानां संख्या त्रिषष्टिः(६३) चतुर्षष्टिः(६४) वेति उपदिश्यते । अ आ आ३ इ ई ई३ उ ऊ ऊ३ ऋ ॠ ऋ३ ऌ ए ए३ ऐ ऐ३ ओ ओ३ औ औ३ एकविंशतिः(२१) स्वराः, क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म् पञ्चविंशतिः (२५) स्पर्शवर्णाः, य् र् ल् व् चत्वारः अन्तःस्तवर्णाः,श्ष्स्ह् चत्वारः ऊष्मवर्णाः, कुँ खुँ गुँ घुँ चत्वारः यमवर्णाः, अनुस्वारः, विसर्गः, जिह्वामूलीय कः, उपध्मानीयः पः, दुःस्पृष्टः ळकारः,

प्लुतलृकारश्चेति सम्मिल्य संस्कृतवर्णाः चतुःषष्टिसंख्याकाः भवन्ति । अनुष्टुप्-छन्दसा रचिता पाणिनीयशिक्षा अतीव सरला सुबोध्या चास्ति ।

**पादटीका**

1. वेदो हि वर्णसंघातो वेदो ब्रह्मेति कीर्त्यते ।
   तस्मात्तु वेदवर्णज्ञो ब्रह्मलोके महीयते ।। शौनकशिक्षा-६५ ।
2. वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्ण तु वाक्षरे ।
   अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु ।।-- अमरकोशः ३.२४३० ।
3. येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः । ऋ. २.१२.४ ।।
   रूशद्वत्सा रूशशती.....वर्णचरत अभिमाने " ऋ. १.११३.२ ।।
4. को विकारी कति – मात्रः कति-वर्णः......।। गो.ब्रा. १.१.२४ ।
5. तैत्तिरीय-आरण्यक ७.२१ ।।
6. "अथापि वर्णोपजनः । आस्थद्वारोभारूजेति" निरुक्त २.१।।
7. द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।
   अकारादि स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ।। शौनकशिक्षा ३ ।।
8. त्रिषष्ठिश्चतुःषष्ठिर्वा वर्णाः सम्भुमते मताः ।
   प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ।। पाणिनीयशिक्षा ३ ।।
9. द्र. पाणिनीयशिक्षा Ed. by, शिवराज आचार्यः कौण्डिन्न्यायनः, Pb. by, चौखम्बाविद्याभवन, वाराणसी, २२१००१ पृ. ५७ ।
10. द्र. ऋक्प्रातिशाख्यम्, १.३ उपरि उव्वटभाष्यम्
11. द्र. आचार्यगोविन्दप्रसादसंपादिता वैयाकरणसिद्धान्तकौमुदी, पृ. ७५ ।
12. द्र. "परेण स्वरेण व्यञ्जत इति व्यञ्जनम्" । तै. प्रा. १.६ उपरि वैदिकाभरणभाष्यम् ।
13. द्र. "व्यञ्जयन्ति प्रकटीकुर्वन्ति अर्थान्निति व्यञ्जनानि" । ऋ.प्रा. १.६ उपरि उव्वटभाष्यम् ।
14. पा.व्या.सू- १.१.९ सूत्रोपरि सि.कौ.वृ
15. द्र. तत्रैव, पृ. ७५ ।
16. द्र. तत्रैव ।
17. द्र.ऋ.प्रा.-१/१०
18. पा.शि.-२२
19. पा.शि.-२३
20. पा.व्या.सू- ८.३.२३
21. पा.व्या.सू- १.१.९ सूत्रोपरि सि.कौ.वृ
22. पाणिनीयशिक्षा-पृ.-१६
23. पा.व्या.सू- ८.३.१५

**सहायकग्रन्थसूची**


1. आचार्यः, उदयनः,शिक्षाशास्त्रम्, रामलाल-कपूरट्रष्ट-रेवली, सोनीपत् (हरियाणा), २०१४
2. आचार्यः, कौण्डिन्न्यायनः शिवराजः, पाणिनीयशिक्षा, चौखम्बाविद्याभवनम्, २०१२
3. एच्.एन्. यादवः, पाणिनीयशिक्षा, हरिश-प्रकाशनमन्दिर, प्रतापनगरचौराहा, जयपुरहाउस, आगरा, (उ.प्र) २०१०
4. गिरिः, गोस्वामीप्रह्लादः, पाणिनीयशिक्षा, चौखम्बासंस्कृतसिरिज्-अफिस, वाराणसी, अ.सं. २०१५
5. घोषः, मनमोहनः, पाणिनीयशिक्षा, कोल्काता युनिवर्सिटि, १९३८
6. चौवे, व्रजबिहारी, ऋग्वेदप्रातिशाख्यम्, भारतीयविद्याप्रकाशनम्, दिल्ली, २००९
7. तिवारी, हरिनारायणः, शिक्षासंग्रहः, चौखम्वा-संस्कृत-सीरीज्-अफिस, चौखम्वाप्रेस, वाराणसी, प्र.सं २०२०

8. दीक्षितः, शैलेन्द्रनाथः, शौनकशिक्षा, आचार्यगोपालचन्द्रमिश्रवैदिकउन्नयनसंस्थानम्, सी.के. ३२/१७, ब्रह्मनाल, वाराणसी, वि.सं.२०६७
9. पाण्डेयः, रामअवधः, ॠग्वेद्-भाष्य-भूमिका, मोतिलाल्बनारसीदास्, दिल्ली, २०११ ।
10. मिश्रः, नारायणः, पाणिनीयशिक्षा, चौखम्बापब्लिशर्स, वाराणसी, २००५
11. मीमांसकः, युधिष्ठिरः, शिक्षा-सूत्राणि, भारतीय-प्राच्यविद्या-प्रतिष्ठानम्, अलवर्-गेट्, अजमेरम्, सं. २०२४